। श्रीः ।

# ॥ ऋग्वेदीयजटालक्षणम् ॥

(श्रीमधुसूदनीयशिक्षान्तर्गतम्)

श्री सत्यव्रतव्याख्यासहितम् ।

नाङ्गलूरु सलक्षणघनपाठिनां श्रीकृष्णमूर्तिशास्त्रिणां अन्तेवासिना
दशग्रन्थी **श्री वेङ्कटरामशास्त्रिणा** यथामति संशोध्य
प्रकटीकृतम् ।

SRI GNANANANDA NIKETAN,
LIBRARY,
THAPOVANAM P.O.
Pin-605756.

1964

श्रीवाणीविलासमुद्रणालयः, श्रीरङ्गम् ।



ஸ்ரீ ஜகத்குரு சிருங்ககிரி ஸ்ரீ சாரதா பீடாதிபதி

**ஸ்ரீமத் அபிநவ வித்யாதீர்த்த மஹாஸ்வாமிகள்**

॥ श्रीमुखम् ॥

# श्रीशृङ्गेरी श्रीजगद्गुरु संस्थानम् ॥

मुद्रा

श्रीमत्परमहंस परिव्राजकाचार्यवर्य पद वाक्य प्रमाण पारावार-पारीण यमनियमासन प्राणायाम प्रत्याहार ध्यान धारणा समाध्यष्टाङ्ग योगानुष्ठाननिष्ठ तपश्चक्रवर्त्यनाद्यविच्छिन्न श्रीशङ्कराचार्य गुरुपरंपरा-प्राप्त षड्दर्शन स्थापनाचार्य व्याख्यान सिंहासनाधीश्वर सकल निगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्ग प्रवर्तक सर्वतन्त्र-स्वतन्त्रादिराजधानी विद्यानगरमहाराजधानी कर्णाटक सिंहासन-प्रतिष्ठापनाचार्य श्रीमद्राजाधिराज गुरुभूमण्डलाचार्य ऋष्यशृङ्गपुर-
वराधीश्वर तुङ्गभद्रातीरवासि श्रीमद्विद्याशङ्कर पादपद्माराधक
श्रीजगद्गुरु श्रीचन्द्रशेखरभारतीस्वामि गुरुकरकमलसञ्जात
श्रीजगद्गुरु शृङ्गेरी श्रीमदभिनवविद्यातीर्थस्वामिभिः

अस्मत्प्रियतमान्तेवासि जम्बुकेश्वरवास्तव्य दशग्रन्थी वेङ्कटरामशास्त्रिविषये नारायणस्मरणपूर्वकं विरचिता आशिषस्समुल्लसन्तु ।

“यस्य निश्वासितं वेदाः” इत्यादिस्मृतिः परब्रह्मणः वदनारविन्दान्निर्गतानां समेषां वेदानां निश्वासवदयत्नसिद्धत्वमवबोधयन्ती वेदानामपौरुषेयत्वं द्रढयति । तेषां चापौरुषेयाणां वेदानामेव

परमश्रेयःसाधनीभूतप्रवृत्तिनिवृत्त्यात्मकधर्मस्य मूलता उररीक्रियते "वेदोऽखिलो धर्ममूलं" इत्यनया स्मृत्या। अर्थतश्च वेदप्रतिपाद्य-धर्माधर्मयोर्मध्ये श्रेयःसाधनीभूतधर्मस्योपादेयता अनर्थसाधनी-भूताधर्मस्य हेयता चोक्तप्रायैव। ते च धर्ममूलभूताः वेदाः वेदैकदत्तदृष्टिभिरस्मत्पूर्वतनमहर्षिभिर्द्वैविध्येन संहितादिप्रकृतिरूपेण जटादिविकृतिरूपेण च मात्रामात्रापरित्यागेन संरक्ष्यमाणास्सन्तः सर्वातिशायिनो वर्तन्त इति निश्चप्रचम्। अर्वाचीनैरपि वेद-रक्षाकाङ्क्षिभिः तथैवाधीयन्ते अध्याप्यन्ते च वेदाः।

भवद्भिः जटालक्षणजिज्ञासूनां सर्वेषामास्तिकानां प्रमोद-स्थानीयं ऋग्वेदीयं मधुसूदनशिक्षान्तर्गतं सत्यव्रतव्याख्यायुतं जटा-लक्षणं मुद्रितं सत्प्रापितमस्मत्सकाशम्। अवलोकितं चास्माभि-रामूलचूडं जटालक्षणम्। जटालक्षणं चेदं विकृत्यध्येतॄणामुपकारकं भवेदिति विश्वसिमः।

आशास्महे च श्रीशारदाशशिकलावतंसयोः असीमकृपया भवद्भिः प्रकाशं नीतः ऋग्वेदजटालक्षणग्रन्थः वेदाध्येतृपाणिपल्लवान् चिरमलङ्कुर्यादिति॥

श्रीः

इति नारायणस्मरणम्

श्रीरङ्गम् श्रीमदाचार्यवर्य (श्रीमदाण्डवन्)
वेदान्तरामानुजदेशिकानां
अभिनन्दनम् ॥

के नाम न जानन्ति पण्डितप्रवरा विप्रवर्या इदं, यत् अक्षरराशिग्रहणमात्रपर्यवसायी अध्ययनशब्दार्थ इति । सस्वराक्षर-समुदायरूपः स खलु वेदः संहिता-पद-क्रमात्मना त्रेधा समाम्नातोऽपि पुनश्च जटाद्याम्नानवशात् अष्टधा समाम्नायते । नेदं त्रेधाऽष्टधा च समाम्नानमाधुनिकैः कल्पितं प्रवर्तितं वा ; परं तु महर्षिभिरेव प्रवर्तितम् ; न तु कल्पितम् इत्येव प्रामाणिकविमर्शकगोष्ठीराद्धान्तः । एवंविधस्य समाम्नानस्य किं फलमिति प्रश्ने, एतदेव समीचीनमुत्तरमित्यध्यवस्यामः, यत् व्युत्पत्तिवैचित्र्यम् । दृश्यते च लोके सङ्गीतावसरे एक एव शब्दः प्रकारान्तराण्याश्रित्य पुनः पुनः पठ्यते गीयते च । तादृशसङ्गीतस्वरमूलभूतोदात्तादिस्वर-घटिताक्षरराशिरूपस्य वेदस्यापि प्रकारान्तराण्याश्रित्य समाम्नानमपि लोकरञ्जनफलकम् । किञ्च, असकृदाम्नानवशात् मूलदार्ढ्यं चानुषङ्गिकं फलं दृश्यते । सर्वथा लुप्तप्राये जटादिपाठे, इदानीमेतादृशग्रन्थावलोकनसन्धुक्षितोत्साहा विप्रवर्याः तत्र तत्र जटादिपाठने प्रवर्तेरन्निति सुदृढं विश्वसिमः । तद्विषये ग्रन्थोऽयं महदुपकरोतीति कृत्वा, एतद्ग्रन्थमुद्रापणकारिभ्यो महाशयेभ्यः परमकारुणिको वेदरूपी भगवान् पद्माकान्तो दयतामित्याशास्महे ।

इति श्रीमदाचार्यवर्य (श्रीमदाण्डवन्) वेदान्तरामानुज-महादेशिकानां अनुज्ञया तत्रभवतां विधेयः,

चित्रकूट विजयराघवः

॥ श्रीः ॥

नाञ्जलूरु सलक्षणघनपाठिनां कृष्णमूर्तिशास्त्रिणां

## मङ्गलाशासनपत्रिका ॥

चिरञ्जीविनो वेङ्कटरामस्य वेदोक्ताः सन्त्वनेका आशिषः । मधुसूदनशिक्षाया मुद्रयित्वा प्रकाशने त्वार्हन्तीमहं जानामि । तावकीनोऽयमुद्योगो नूनमस्मत्परम्पराया एवोत्कर्षावहः । लोकोपकारकश्चायम् । शिवकामसुन्दरीसमेत श्रीनटराजमूर्तेः परमकृपापात्रं भूया इति हार्दमाशिषो वाचये । उत्तरोत्तरं श्रेयःपरंपराभाजनं भूयाः ॥

सताराबास्तव्यानां जल्परघनपाठिनां

## अभिनन्दनपत्रिका ॥

दशग्रन्थी वेङ्कटरामशास्त्री जगति विख्यातो लक्षणविद्वान् । स्वासाधारणशब्दजालेन पण्डितसभायां विस्मयमावहति । गुरुकटाक्षपरिपूर्णः; जन्मान्तरवासनाबलसुभगः । सलक्षणघनपाठिना नाञ्जलूरु कृष्णमूर्तिघनपाठिना इयं विद्या अस्मै सम्यक् शिक्षिता । एवमयमनेकग्रन्थान् प्रकाशयेदिति विश्वसिमि ॥

॥ श्रीः ॥

॥ श्रीगुरुभ्यो नमः ॥

॥ नम ऋषिभ्यो मन्त्रकृद्भ्यः ॥

# ॥ प्रस्तावना ॥

आर्याः ;

नेदमविदितं सर्वेषां यत् 'स्वाध्यायोऽध्येतव्यः' 'यहचोऽधीते' इत्यादिप्रमाणशतैर्व्रात्यतानिवृत्तये सकलनिःश्रेयसावाप्तये च ब्राह्मणैः निष्कारणः षडङ्गो वेदोऽध्येय इति। तत्तत्फलसाधनकर्मौपयिक-ज्ञानोत्पादनेनेव जपादिनापि चिन्तितमनोरथसाधनेन वेदस्यार्थ-वत्त्वं तावदविवादम्। तत्र च 'संहितापाठतः पुण्यं द्विगुणं पदपाठतः। त्रिगुणं क्रमपाठेन जटापाठेन षड्गुणम् ॥' इत्यादि-वचनेन सांप्रदायिकानुष्ठानेन च जटाघनादिपाठस्याप्यनुष्ठेयत्वे सिद्धे जटाघनादीनां चापौरुषेयत्वं, प्रामाण्यं, अध्येयत्वं च सर्व-संप्रतिपन्नम् ॥

तत्र कालेऽस्मिन् मूलाध्ययनमेव वा तद्धारणमपि वाऽस्तं प्रापयितरि प्रेक्षावतां जटादिशिक्षणं कथमाशासनीयं भवेत्? विशेषतो ऋग्वेदे जटादावनुक्रमव्युत्क्रमादिस्थलेषु च समयस्थलेषु च एकमात्रत्रिमात्रकंपस्थलेषु च एवमन्यत्रापि सन्धिवैविध्यं मति-मतामपि तदध्ययनप्रवृत्तिविघटनक्षमं सत् बह्वृचेषु जटावल्लभान् घनपाठिनश्च मृग्यतां नयतीति नात्युक्तिरियम् ॥

अतो मधुसूदनो नाम बह्वृचोत्तमो भगवतो व्यालिमुनेर्लक्षणग्रन्थमनुसृत्य परमया कृपया हृद्यतमैः पद्यरत्नैर्जटापाठेऽवश्यापेक्षितान् अखिलानर्थान् संगृह्याद्भुततमं शिक्षाग्रन्थं प्रणिनाय । तस्य च 'नामूलं लिख्यते किंचित् नानपेक्षितमुच्यते' इति न्यायेनानपेक्षितविस्तारापेक्षितसंकोचादिकमन्तरेण व्युत्पित्सुजनभाग्यवशाद्विशदतमं ललिततमं च व्याख्यानं श्रीसत्यव्रतनाम्ना महाभागेन व्यरचि ॥

उभयोरनयोर्मधुसूदनसत्यव्रतयोर्मूलव्याख्यानाचार्ययोरन्येषां भारतीयप्रबन्धॄणामिव जननदेशकालचरितादिमहिमानं हन्त वयं दैवदुर्विपाकेन न निश्चेतुं प्रभवामः ॥

अथापि जटापाठेऽवश्यापेक्षितानर्थान्निःशेषं संगृह्य विशदतया तयोरुपपादनप्रक्रिया नूनं न कस्यापि रसिकस्य न मनोह्लादाय भवेदिति सशपथमुद्घोषयामः ॥

विकृत्यष्टकनिर्देशः, तस्य क्रमाधीनता, अनुक्रम, उत्क्रम, व्युत्क्रम, अभिक्रम, संक्रमरूपक्रमपञ्चकं, क्रमजटादीनां प्रामाण्याध्येयत्वयोः समर्थनं, आकारगर्भत्रिक्रमस्य जटाभावार्हता, सानुस्वारे तत्र मध्यस्थपदवेष्टनं, व्युत्क्रमे प्रातिशाख्यमननुसृत्य व्याकरणस्य अनुसरणीयत्वं, तत्रैव संहिताधर्माणां षत्व-णत्व-नत्व-दत्व-ह्रस्वत्वदीर्घत्वानां लक्षणपूर्वकं पदवत्पठनीयत्वं, ओकारस्य औकारभावः, क्रमव्युत्क्रमयोराद्यन्तपदयोरिव मध्यस्थ-

-च्छदस्थानावर्तनीयत्वं, अनावर्तितेऽपि मध्यमपदे वैयाकरणनियम-रूपपदधर्मानुवर्तनं, बहिष्कृतस्य मध्यमपदस्यैकीकृतात्पदात् पूर्वं विलोमे पठनीयत्वं, संबोधनभिन्नानां औदन्तनिपातानां विलोमे प्रगृह्यत्वं, इकार-इवकारयुतत्र्यक्षराणामप्रगृह्यत्वं, ईदूदेदोदन्तानां सर्वेषां प्रगृह्यत्वं, मकार-दकारनकारपूर्वकस्य उकारस्य वत्वं, अन्यस्य प्रगृह्यत्वं, ऐक्यमापन्नस्यापि नकारपूर्वकस्यापि तस्य वकारादेशः, उकार-ओकारपूर्वकस्यैव आवादेशावयववकारस्य लोपः, ओकारभावं गतस्यापि उकारस्य प्रगृह्यत्वं, अकारस्य व्युत्क्रमे एकारेण पररूपैकादेशः, क्रमे वेष्टनपदविवेकः, समयलक्षणं, तदानीं जटाविधिप्रकारः, संहितायां श्रुतायाः प्लुतेर्व्युत्क्रमेऽपरित्यागः, तिरोविराम–तैरोव्यञ्जन–पादवृत्त–जात्य–अभिनिहित, क्षैप्र, प्रश्लिष्टरूपस्वरितानां लक्षणोदाहरणानि, तत्र जात्यादिषु चतुर्ष्वपि कम्पे तदभावे च अनुक्रमसंक्रमसाम्यं, ह्रस्वदीर्घकम्पेषु कालशोधनं, कम्पनिमित्तं, अभिनिहितात् पूर्वस्योदात्तस्य त्रिमात्रकम्पाभावः, कम्पं प्राप्तानां चतुर्विधानां स्वरितानां जटायां वाच्यत्वं, इमे अन्ये चैतादृशा अर्था जटापाठापेक्षिता अत्र सोदाहरणं सम्यङ्निरूपिताः ॥

वयमपि कानिचनोदाहरणानि सुखप्रतिपत्त्यर्थं लिखामः।

उदुनो न उ उदुदुनः। उदुश्रिये श्रिय उ उदुदुश्रिये। उदु ब्रह्माणि ब्रह्माण्यु उदुदु ब्रह्माणि। उदुत्येत्य उ उदुदुत्ये। उदुष्यः

स्य उ उदुदुष्यः। उदुष्टुनः स्तुन उ उदुदुष्टुनः। उदुतिष्ठ तिष्ठो उदुदुतिष्ठ। अयमुते त उ अयमयमुते। अभूदुभा भा उ अभूदभूदुभाः। अन्य उ जनन्त जनन्तो अन्ये३न्य उ जनन्त। अत उत्वा त्वो अतो त उ त्वा। इद्धत्यत्यु इदिद्धति। इदुप्रप्रो इदिदु प्र। इदुतातो इदिदुता॥ एष उ स्यः स्य उ एष एष उस्यः। एता उ त्यास्त्या उ एता एता उत्याः॥ अभूवौंक्षीरौक्षीर्व भूरभूवौंक्षीः। अभूदुकेतुः केतुर्वभूदभूदुकेतुः। इदुश्रवोभिः श्रवोभिर्विदिदुश्रवोभिः। इदुयोनिर्योनिर्विदिदुयोनिः। इदुहव्यै- र्हव्यैर्विदिदुहव्यैः॥ उदुज्योतिर्ज्योतिरूदुदुज्योतिः। उदुवायुभि- र्वायुभिरूदुदुवायुभिः। उदुस्त्रानेभिः स्त्रानेभिरूदुदुस्त्रानेभिः॥ उदुस्वरुःस्वरूरूदुदुस्वरुः॥ उदूषुसूदुदूषु। उशन्नुषुणो नः सूशन्नु- शन्नुषुणः। ऊर्ध्व ऊषुणो नः सूर्ध्व ऊर्ध्व ऊषुणः। अस्माभि- रूषुस्व१ स्माभिरस्माभिरूषु। अस्या ऊ षु णो नः स्त्र१ स्या अस्या ऊषुणः॥ इममूषुस्त्रि१ ममिममूषु। अपादु शिप्रि शिप्र्यु१ अपादपादुशिप्रि। तम्वभ्य१ भ्यू१ तं तंवाभि॥

अत्रानुक्तमपि जटाघनयोर्भेदं किंचिद्दिङ्मात्रं प्रदर्शयामः- जटायामपठ्यमानः कम्पो घने पठ्यते। यथा-(१) एही ह्ये ह्यूषु स्वि१ ह्ये ह्यूषु। (२) अन्नमत्त्यत्त्यन्नमन्नमत्ति यो यो१ त्यन्नमन्नमत्ति यः॥

जटायां अनुक्रमे त्रिमात्रकम्पः संक्रमे एकमात्रो यथा—वे२

मा मा ते ते१ मा । अत्रोदात्तयुक्त एकमात्रकम्पः यथा—अघा कः को१ घा घा को नु नु को१ घा घा को नु । इहि तिस्रस्तिस्र इही हि तिस्रः । अत्र समानपदत्वात्कम्पाभावः ॥

अपः संसमपो३ पः सं । अत्रैकाक्षरोदात्तपदत्वेऽपि एकमात्रकम्पाभावः । इतरत्स्वयमूह्यम् ॥

उत्सर्गापवादबहुलेऽस्मिन् विषये शुद्धसंप्रदायागतान् पाठान् शास्त्रोक्तलक्षणापेतानपि न वयं दूषयितुमर्हाः ॥

सव्याख्यां शिक्षामिमामिदानीं अध्येतृलोकसौकर्याय गुरुकृपया यथामति संशोध्य मुद्रायित्वा प्रकाशयामः । अत्र स्थितान् दोषान् पण्डिता यदि प्रदर्शयन्ति तर्हि द्वितीयमुद्रणावसरे शोधयितुं शक्नुयामेति सविनयं विज्ञापयामः ॥

वेदवैदिकसंरक्षणैकदीक्षितानां श्रीमत्परमहंसपरिव्राजकाचार्येत्यादिनैकबिरुदालङ्कृतानां श्रीमच्छृङ्गगिरिविराजमान श्रीमच्छारदाम्बाकटाक्षलहरीसमेधमान श्रीमदाचार्यपीठसाम्राज्यमात्मभूम्ना सौराज्यरम्यमादधानानामस्मत्प्रार्थनामङ्गीकृत्य श्रीमुखवितरणपूर्वकमाशिषां ततीरनुगृहीतवतां श्रीजगद्गुरूणां सन्निधाने भूयो भूयो वन्दनपरंपरा विज्ञापयामः । तथा श्रीमद्वेदमार्गप्रतिष्ठापनाचार्येत्यादि बिरुदावली—परिष्कृतानां श्रीमदाण्डवन् वेदान्तरामानुजमहादेशिकानां चरणकमलयोर्नैजमूर्तीनां अस्मदाचार्यचरणानां नाकमनु

श्रीकृष्णमूर्तिशास्त्रिणां चरणकमलयोश्च धन्यतानिवेदनपुरःसरं नमस्कारान् विदध्मः। आशीर्वादपुरःसरं प्रोत्साहनेनानुगृहीतवतां श्रीजल्पर् घनपाठिनां पादपद्मयोश्च प्रणतिमातिं कुर्मः ॥

अन्ततो वयं प्रणिपत्य प्रार्थयामहे वेदपुरुषं तद्भक्तान् वैदिकांश्च यत् त एतादृशिकलमानेन स्वसंकल्पेन ऋग्वेदजटावल्लभ-गोष्ठीर्भारतभूमौ सर्वत्र संवर्धयेरन्निति शम् ॥

इति

कृष्णराजपुराभिजनो जम्बुकेश्वरवास्तव्यः दशग्रन्थी

वेङ्कटराम शास्त्री

चिदम्बरं सलक्षणघनपाठिनां

नाङ्गल्लूर्, कृष्णमूर्तिशास्त्रिणामन्तेवासी

॥ शोधनपत्रिका ॥

| पृष्ठं | पंक्तिः | अशुद्धं | शुद्धं |
|---|---|---|---|
| १३ | ४ | साहं | सहं |
| ३१ | १ | विरुद्धं | वीरुद्धं |

॥ श्रीः ॥

॥ श्रीगुरुभ्यो नमः ॥

# ॥ ऋग्वेदीयजटालक्षणम् ॥

( श्रीमधुसूदनशिक्षान्तर्गतम् )

सत्यव्रतव्याख्यासहितम् ॥

---

महाकृतिरियं मम प्रकृतिनिर्मलाहारिणी

सुधाविमतिकारिणी विशयहारिणी सेविनाम् ।

वचस्यमपहारिणी परविपश्चितामन्वहं

मनोभुवि विहारिणी भवतु वेदविद्याविदाम् ॥ १ ॥

अथ मधुसूदनमहामतिः स्वकृतेः श्लेषेण स्वाकृतिसाम्यं सूचयन्नेव वेदविशारदोपादेयतामाशास्ते । ग्रन्थपक्षे—ममेयं महती च सा आकृतिश्च महाऽऽकृतिः । तत्कृतोऽयं महाग्रन्थ इत्यर्थः । वेद-विद्याविदां—वेदतद्विकृतितल्लक्षणरूपविद्याविशिष्टानामित्यर्थः । महाकृति-रित्यत्र महती आकृतिरित्यपि लभ्यते । तत्पक्षे, ममेयं महती आकृतिर्यथाकथंचित्कुतिकर्य्यपि कृपालुभिर्वेदवेत्तृभिर्मनसा वचसा प्रशस्यतामेवेत्यर्थः ॥

हयग्रीव नृसिंहादिकृत जटादिलक्षण विकृतिकृतिभिरेव चारितार्थ्यान्न कृत्यमनया कृत्येत्यत आह–प्रकृतिनिर्मलाहारिणीत्यादि विशेषणादीनि । आकृतिर्लोकसाधारणी कुतः प्रशस्येत्यत एवाहेमानि विशेषणानि । कृतिपक्षे, प्रकृष्टाः कृतयो हयग्रीवनृसिंहादिकृतलक्षणग्रन्थाः । तेभ्यो निर्मला अत एव हारिणी मनोहरा ॥ यद्वा प्रकृष्टाः कृतयो हयग्रीवादिग्रन्थाः तेषां निर्मलः –अदुष्टः स तस्यास्तीति तथोक्ता । आकृतिपक्षे, प्रकृतिनिर्मला स्वभावतोऽदुष्टा, अत एव हारिणी मनोहरा, तुलसीनलिनाक्षमणिमयहारवती वा । अथवा प्रकृतितो निर्मलाः प्रकृतिनिर्मला ये गोमयगोमूत्रगोक्षीरगोदधिगोघृतादयः पदार्थास्तेषामेवाहारोऽस्या अस्तीति तथोक्ता । कृतिपक्षे, सेविनां ग्रन्थार्थानुभवकारिणां विशयहारिणी – संशयपरिहारिणी । अत एव सुधाविमतिकारिणी–सुधापानविषयक–वैमुख्यदायिनीति यावत् । सकलसंशयपरिहारकशब्दार्थातिमधुर – एतद्ग्रन्थसेवापराणां पीयूषपानेऽपीच्छा न प्रवर्तत इति भावः । आकृतिपक्षे, सेविनामन्तेवासिनां सुधाविमतिकारिणी झटिति ग्रन्थार्थावगाहनसमर्था या मतिः तां कर्तुं शीलमस्या अस्तीति तथोक्ता । यद्वा सुधा–सुधायमाना मनोवाग्वीक्षणैरिति शेषः । अत एव सेविनामविमतिकारिणी स्वविषयेऽवैमत्यकारिणीत्यर्थः । विमतिकारिणी परमात्मविषयकमतिकारिणी वेत्यर्थः । विशयहारिणी विशिष्टाभ्यां देवार्चनमंत्रजपादिकर्मानुकूल्याचरितेनेति शेषः । शयाभ्यां–हस्ताभ्यां मनोहरेत्यर्थः । पक्षद्वयेपि समानं स्पष्टार्थम् ॥ १ ॥

यासां विकृतीनां विवृतिर्विधेयत्वेन प्रतिज्ञापिता कास्ताः ? कति ? किंनामानः ? इत्यत आह —

**जटामालादण्डरेखारथध्वजशिखाघनाः ।**
**क्रममाश्रित्य निर्वृत्ता विकारा अष्ट विश्रुताः ॥ २ ॥**

विश्रुताः, 'जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः । अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः' ॥ इति स्मृतिप्रमाण-प्रसिद्धा इत्यर्थः ॥ २ ॥

विकृतिष्वष्टसु प्रथमतो निर्दिष्टो जटाश्रयः कतिविधः ? केना-कारेण जटां निष्पादयतीत्यत आह —

**द्विपदादिक्रमाः पञ्च प्राक्क्रमाद्व्युत्क्रमात्ततः ।**
**पुनः क्रमादुच्चरिता जटात्वं प्रापिता बुधैः ॥ ३ ॥**

द्विपदादिक्रमाः त्रिपदचतुष्पदपञ्चपदक्रमा आदिपदेनात्र ग्राह्याः । द्विपदादीत्यत्र आदिपदमसंकुचितमित्यत्राह पञ्च-पञ्चैवेत्यर्थः । तैर्बुधैः कर्तृभिः प्राक् — आदौ क्रमात् — यथावस्थितानुक्रमात् उच्चरिताः । ततः पश्चात् व्युत्क्रमादुच्चरिताः विपर्यासादभिलपिता इत्यर्थः । अथ पुनः क्रमात्पूर्ववद्यथावस्थितक्रमादित्यर्थः । उच्चरिताः सन्तो जटात्वं जटाशब्दवाच्यत्वं प्रापिताः जटाशब्दवाच्यत्वेन निष्पादिताः । एवं त्रिवारमुच्चार्यमाणः क्रमो जटादिशब्दवाच्यः ज्ञेयो भवति । स्वमुखेनो-

चार्य श्रोतॄन् प्रति ज्ञापिता इति यावत्। एवंक्रमस्यावर्तितस्य जटात्वमपि ॥ ३ ॥

नन्वस्य कति किंनामानः क्रमाः ? इत्यत आह —

**अनुक्रमश्चोत्क्रमश्च व्युत्क्रमोऽभिक्रमस्तथा ।**
**संक्रमश्चेति पञ्चैते जटायां कथिताः क्रमाः ॥ ४ ॥**

अग्निमीळे इत्यनुक्रमः, ईळ ईळे इत्युत्क्रमः, ईळेऽग्निं इति व्युत्क्रमः, अग्निमग्निमित्यभिक्रमः, अग्निमीळे इति संक्रमः। बुधैरित्यनुवर्तते। एवमनुक्रमादिनामकाः पञ्च क्रमा जटायाम्। अग्निमीळे, ईळेऽग्निम्, अग्निमीळे इत्यादिजटोच्चारणदशायां कथिता निर्दिष्टा भवन्तीत्यर्थः ॥

ननु जटास्वरूपमनिरूपणीयम्, अष्टविकृतीनामप्रामाणिकत्वेन तस्याप्रामाणिकत्वात्। तथाहि – किं विकृतीनामष्टानां पौरुषेयत्वेन प्रामाण्यम् किं वाऽपौरुषेयत्वेनाभ्युपगम्यते ? नाद्यः, पुरुषेषु अप्रामाण्येन तत्कृतासु विकृतिषु प्रामाण्यानिश्चयात्। न द्वितीयः, अस्या अपौरुषेयत्वे प्रमाणाभावात्। अपौरुषेयवेदसंबन्धेन तासामपौरुषेयत्वं चेत् एकवचनोभयवचनादीनामपि तथात्वप्रसङ्गात्। अस्तु वा यथा-कथंचित्तासां प्रामाण्यम्। तथापि नाध्येयत्वं तासाम्, स्वाध्यायोऽध्येतव्य इति विधिविषयत्वाभावात्। तर्हि पदक्रमयोः कथमध्येयत्वमिति

चेत्, न, स्वर्गकामः प्रतृणमुभयकाम उभयमन्तरेणेति फलोक्तिपूर्वक-तदध्ययनविधानात्। न हीदृशो विधिर्विकृत्यध्ययनस्यास्ति। एतेन व्याकरणनिरुक्तादिवद्विकृतीनां प्रामाण्यमध्येयत्वं चेति परास्तम्॥

अत्रोच्यते—पुरुषेषु यदुक्तमनिश्चयात्पुरुषप्रणीतप्रामाण्यानिश्चय इति तन्न, व्याकरणनिरुक्तादिप्रणेतृष्वपि अनिश्चयेन तत्प्रणीताप्रामाण्य-प्रसंगात्। व्याकरणादिप्रणेतृषु ऋषित्वेन निश्चय इति चेत् तर्हि विकृति-प्रणेतृणां व्याल्याडीनामपि ऋषित्वेन तदुक्तविकृतीनामपि पौरुषेयत्वेनापि प्रामाण्ये बाधकाभावात्॥

अभ्युपेत्येदमुक्तम्। वस्तुतस्तु पदक्रमयोरिवानाद्यविच्छिन्ना-ध्ययनाध्यापनपरंपरासिद्धेर्जटादीनामपौरुषेयत्वेनापि प्रामाण्ये बाधका-भावात्। लक्षणप्रणेतृणां व्याळ्यादीनां संप्रदायप्रवर्तकत्वेन जटादिनिर्मा-तृत्वाभावात्। अन्यथा अग्न्यादीनां ऋग्वेद एवाग्नेरजायत इत्यादिश्रुति-सिद्धे ऋगादिसंप्रदायप्रवर्तकाभावप्रसङ्गात् प्रातिशाख्यलक्षणकर्तृणां शौनकादिमुनीनां ऋगादिनिर्मातृत्वप्रसङ्गाच्च॥

अत्रेमौ प्रयोगौ-जटादिविकाराः पौरुषेयाः, पौरुषेयत्वेनापि प्रमाण-भूताः प्रातिशाख्यमिव अनाद्यध्ययनादिपरंपरागोचरत्वात् संहितादिवत्॥

जटादिविकारा अध्येयाः विधिविषयत्वात् पदक्रमवत्। न च हेतुरसिद्धः, तेषामपि पदक्रमयोरिव श्रौताध्ययनविधिविषयत्वात्॥

न च, 'अन्नाद्यकामो निर्भुजं ब्रूयात्' 'स्वर्गकामः प्रतृणम्' इत्याद्यौपनिषद्वाक्ये त्रयाणां संहितादीनामिव जटादीनामध्येयत्वेनाप्रतिपादनात् विकृतीनामध्ययनविधिर्नैवेति वाच्यम्, उपनिषदि क्रममिति लघुनामनिर्देशं विना क्रमे सर्वविकृतिसाधारणे संहितापदोभयसाक्षित्वरूपप्रकृतिनिमित्तकोभयमन्तरेण रूपसामान्यशब्दप्रयोगान्यथानुपपत्त्या जटादिविकृतीनामप्यध्ययनविधिविषयत्वस्य सिद्धत्वात्। अत एव भाष्ये अथातो निर्भुजप्रवादाः इत्यत्र निर्भुजशब्देन पदक्रमयोरुभयोरेवोपलक्षणीयत्वेन तद्गुणसंविज्ञानाभिप्रायेण पदादेरिति निर्देशो कर्तव्येपि जटादिसर्वविकृतिसंग्रहार्थं पदादीनामिति बहुवचनान्तप्रयोगः ॥

न चाद्यानुमानहेतौ आदिपदं व्यर्थं तस्याध्ययनपरंपराविषयत्वरूपहेत्वन्तरसूचकत्वात् ॥

किं च भगवतो व्याळ्याचार्यस्य जटायां लक्षणप्रणेतृत्वान्यथानुपपत्त्या च जटाया अपौरुषेयत्वप्रामाण्याध्येयत्वानां सिद्धिः। तथा चायं प्रयोगः—जटा अपौरुषेया, प्रमाणं, अध्येतव्या च ऋषिप्रणीतलक्षणत्वात् संहितावत्। न ह्यपौरुषेयेष्वप्रमाणेष्वनध्येयेषु सांप्रदायिकपाठसंरक्षणाय लक्षणानि प्रणयन्ति ॥

न च व्याळेः ऋषित्वमाचार्यत्वं च कुत इति वाच्यम् 'आचार्या व्याळिशाकल्यगार्ग्याः' इति शौनकेन व्याळेः शाकल्यगार्ग्यर्षिभ्यां सह संगृहीतत्वादाचार्यत्वेन कण्ठतो निर्देशाच्च शौनकोक्तो

व्याळिर्ऋषिराचार्यो लक्षणकर्ता । व्याळिर्नाम मानुषो भिन्न इति चेत् एवं सति माध्यन्दिनादिशाखासु जटाया लक्षणप्रवर्तकानां कात्यायनादीनामपि मानुषत्वप्रसङ्गाद्यत्किंचित्तदुपेक्षणीयमेव ॥

एतेनान्तरिक्षायतनमुभयमन्तरेणेत्यत्र साधारणोभयमन्तरेण शब्दव्याख्यापितविकृतीनामपि नृसिंहदेवताकत्वम् ॥

अथ पदोनमुभयमन्तरेणेत्यत्र सामान्यतो ज्ञापितानां तासां गुणत्वेन 'नारुद्रः क्रमपाठकः' इति "पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः । स्वरमात्रविशेषज्ञो गच्छेदाचार्यसंपदम् ॥" इति पदक्रमयोर्यथा पाठकस्य लौकिकालौकिकं फलवचनं न तथा जटाया इति वाच्यम्, उक्तद्वितीयप्रमाणवचनेन विशेषपदेन जटादिविकृतीनां प्राप्तेः, तत्पाठकानामपि तादृशफलवचनात् । अन्यथा विशेषपदवैयर्थ्यप्रसङ्गात् । अन्यानि प्रमाणानि वराहपुराणे — "संहितापाठतः पुण्यं द्विगुणं पदपाठतः । त्रिगुणं क्रमपाठेन जटापाठेन षड्गुणम् ॥" मार्कण्डेय उवाच — "क्रमाध्ययनसंपन्नो मन्त्रब्राह्मणपारगः । जटापरायणपरो विष्णुलोके महीयते ॥ जटापाठपरं विप्रं यो विगर्हति मूढधीः । पुनरावृत्तिराहित्यं न स प्राप्नोति नान्यथा ॥" वृद्धमनुरप्याह — "वेदवेदार्थतत्वज्ञा जटाक्रमविशारदाः । श्रोत्रिया ब्राह्मणाः श्रेष्ठाः पङ्क्तिपावनपावनाः" ॥ पाराशर्योऽप्याह — "संहितावित्स्वर्गकामी पदवेदी महर्गतिः । क्रमी जनतपःसत्यगामी वैकुण्ठभाग्जटी ॥" आदित्यपुराणे च — "स्वधर्मशालिनो विप्रा मन्त्रब्राह्मणपारगाः । कर्मकाण्डेषु कुशलाः

क्रमाध्ययनतत्परा: ॥ जटाध्ययनसंपन्नाः सर्ववेदार्थपारगाः। निषेदू रन्तिदेवस्य सदसि ब्रह्मवित्तमाः ॥" इति। "वैदिकैः पठ्यमानत्वात् प्रत्यक्षस्मृतिमूलतः। तज्जटाध्ययनं कार्यं पङ्क्तिपावनकारणात् ॥ जटादिविकृतीनां ये पारायणपरायणाः। महात्मानो द्विजश्रेष्ठास्ते ज्ञेयाः पङ्क्तिपावनाः॥" इति चादित्यपुराणे ॥ ब्रह्माण्डे च – "शाकल्यस्य शतं शिष्या नैष्ठिकब्रह्मचारिणः। पंच तेषां गृहस्थास्तु धर्मिष्ठास्ते कुटुम्बिनः। शैशिरो बाष्कलः सांख्यो वात्स्यश्चैवाश्वलायनः। पञ्चैते शाकलाः शिष्याः शाखाभेदप्रवर्तकाः। ऋग्वेदादिमहाशाखा कल्पाख्या चेतरा मता ॥ शाकलाः शौनकाः सर्वे कल्पशाखां प्रचक्षते ॥ कल्पो नाम श्रौतसूत्रं स्मार्तमप्युच्यते बुधैः। गार्ग्यश्च वाथ माण्डूकी शैशिरीयप्रवर्तकाः ॥ मुनिर्व्यालिस्तु भगवान् सर्वशाखीयलक्ष्यकृत् ॥" इति ब्रह्माण्डे ॥ ४ ॥

तर्हि द्विपदक्रमत्वाविशेषादाकारगर्भत्रिक्रमेषु पुनःपुनरुच्चार्यमाणं त्रिपदादिक्रमणमपि क्रमव्युत्क्रमपुनःक्रमैर्न जटाभावमर्हतीत्याह —

आकारगर्भत्रिपदक्रमेष्वाकारपूर्ववत् ।
पुनरुक्तं पदद्वन्द्वं त्रिक्रमे द्विपदभ्रमम् ।
हर्तुमेव प्रवृत्तत्वात् जटाभावं न चार्हति ॥ ५ ॥

आकारो गर्भो येषां ते आकारगर्भाः ते च ते त्रिपदक्रमाश्च । तेषु यथोक्तेषु, 'देवा एह देवेभिरागमत्' इत्यादिषु आकारः पूर्वो

ययोर्मध्ये तथोक्तम् । पुनरुक्तं – पुनरुच्चारितम् । एह आगमत् इत्यादिरूपं पदद्वन्द्वं त्रिक्रमे त्रिपदक्रमेषु द्विपदक्रमभ्रमं हर्तुमेव प्रवृत्तत्वात् । देवा, एह, देवेभिरागमत् इत्यादिषु क्रमेषु मध्यस्थाकारस्य पूर्वपदसंगतत्वेन वा उत्तरपदसंगतत्वेन वा एकपदप्रतीतिप्रयुक्तद्विपदक्रमत्वभ्रान्ति वारयितुमेवोच्चारितत्वादित्यर्थः । जटाभावं क्रमव्युत्क्रमपुनःक्रमैरुच्चारणविषयतां न चार्हति । चोऽवधारणे, नैव प्राप्नोतीत्यर्थः । एहेत्यादेः पुनरुक्तस्य क्रमत्वाभावज्ञापनाय पदद्वन्द्वमित्युक्तम् ॥

ननूक्तपदद्वन्द्वस्य क्रमत्वाभावः किमाकारपूर्वकत्वादुच्यते अथवा क्रमलक्षणाभावात् ? नाद्यः, 'एन्द्रसानसिं' इत्यादौ एन्द्र इत्यादीनामपि क्रमत्वाभावप्रसङ्गात् । नेतरः, उत्तरक्रमं स्पृष्ट्वान्त्यपदवत्त्वलक्षणक्रमलक्षणस्य विद्यमानत्वादिति । मैवम्, उक्तपदद्वयस्य त्रिविधक्रमान्तःपातित्वाभावात् । तथाहि—क्रमस्त्रिविधः आद्यमध्यान्त्यक्रमभेदात् । तत्राद्यक्रम उत्तरक्रमं स्पृष्ट्वाऽन्त्यपदमात्रः । मध्यमक्रमस्तु पूर्वोत्तरक्रमस्पृष्टपूर्वोत्तरपदः । अन्त्यक्रमस्तु पूर्वक्रमस्पृष्टपूर्वपदमात्रः । न ह्येतेषु क्रमेषूक्तपदद्वन्द्वस्य यत्र क्वचिद्वान्तर्भावो भवितुमर्हति येनास्य क्रमत्वं स्यात् । न चास्य मध्यमक्रमेऽन्तर्भावः तस्योत्तरक्रमं स्पृष्ट्वाऽन्त्यपदत्वेपि पूर्वक्रमस्पृष्टपूर्वपदत्वाभावात् । न चास्यापि पूर्वभूतत्रिक्रमस्पृष्टपूर्वपदत्वमस्त्येवेति वाच्यम् । तथापि सर्वमध्ये क्रमसाधारणपूर्वक्रमान्त्यपदवत्त्वस्याभावात् ॥

अङ्गीकृत्यैवमुक्तम् । वस्तुतस्तु उत्तरक्रमस्पृष्टान्त्यपदत्वधर्मस्य त्रिक्रमनिष्ठत्वेनोक्तपदद्वये नास्त्येव उत्तरेणापि तेन तस्यां क्रमत्वप्रसङ्गः ॥

तथा चायं प्रयोगः — मध्यम—आकारं गर्भत्रिक्रम उक्तक्रमः अन्त्यपदसंबन्धत्वे सति आकारगर्भक्रमत्वात् । सानुस्वारगर्भ—' अस्मदाँ ऋच ' इत्यादित्रिक्रमवत् । एतेनाद्यक्रमलक्षणमुक्तपदद्वयेऽतिव्याप्त-मिति निरस्तम् । कथंचिदुत्तरक्रमं स्पृष्ट्वान्त्यपदमात्रेणाद्यक्रमवत् । क्रम-त्वेपि द्विपदक्रमत्वभ्रान्तिवारकत्वेनान्यथासिद्धत्वादनन्यथासिद्धक्रमत्वा-भाव इति तत्वम् । अतो नोक्तपदद्वयस्य क्रमत्वाभावाज्जटाभाव इत्यलम् ॥ ५ ॥

आकारगर्भत्रिक्रमेषु द्विपदक्रमत्वभ्रमवारणाय पुनराकारसहित-पदोच्चारणमित्यत्र सदृष्टान्तमाह —

**सानुस्वाराकारगर्भत्रिक्रमप्रभृतौ यथा ।**
**द्विक्रमत्वभ्रमं हर्तुं मध्यस्थपदवेष्टनम् ॥ ६ ॥**

अनुस्वारेण सहितः सानुस्वारः स चासावाकारश्च तथोक्तः । स गर्भे येषां, ते च ते त्रिक्रमाश्च ते प्रभृतिरादिर्यस्य तस्मिन् तथोक्ते ' अस्मदाँ ऋचः ', ' मोषुण ' इत्यादौ यथा द्विक्रमत्वभ्रमं हर्तुं मध्यस्थ-पदवेष्टनम् अस्मदाँ ऋचः, मोषुणः इत्यादिक्रमेषु मध्यस्थस्य ' आँ सु ' इत्यादिपदजातस्य पूर्वोत्तरपदैक्यप्रतीतेः प्रयुक्तद्विपदक्रमत्वभ्रमवारणाय एत्या, स्विति सु इत्यादिरूपं वेष्टनम् इत्यादिशब्दगर्भत्वेनावर्तनं क्रियते

तथैवाकारगर्भत्रिक्रमेषु द्विक्रमत्वभ्रान्तिवारणाय प्रवृत्तत्वेन पुनरुच्चरितस्य मध्यस्थाकारपूर्वकपदद्वयस्य न जटाभाव इत्यर्थः ॥ ६ ॥

क्रमे यथा प्रातिशाख्यलक्षणानुसरणं क्रियते जटायां तथैव व्युत्क्रमेपि न कर्तव्यं किम्, न कर्तव्यं चेत्किमनुसरणीयम् इत्यत आह —

**जटायां क्रमयोः प्रातिशाख्यलक्षणलक्ष्यता ।**
**व्युत्क्रमे सा मता नैव तत्र व्याकरणं मतम् ॥ ७ ॥**

जटायां क्रमयोः क्रमपुनःक्रमयोः प्रातिशाख्यलक्षणलक्ष्यता तल्लक्षितत्वमिति यावत् । स्वीकार्येति शेषः । व्युत्क्रमे तु सा प्रातिशाख्यलक्षणलक्ष्यता नेव मता, न संमता, नैव स्वीकर्तव्येति यावत् ॥

अयं भावः — जटायां क्रमपुनःक्रमयोः मन्त्रसंहितोच्चारणाङ्ग-क्रमानुसारित्वादुचितं तयोः प्रातिशाख्यलक्षणलक्ष्यत्वम् । व्युत्क्रमस्य तथात्वाभावात् लक्षणानुसरणं नोचितमिति चेत् तर्हि व्युत्क्रमसन्धौ किं शास्त्रं प्रमाणमित्याशङ्कायां मतमुक्तं तत्र व्याकरणं मतमिति । तत्र व्युत्क्रमसन्धिः कर्तव्य इत्यर्थः । तर्हि जटायां व्युत्क्रमसन्धौ व्याकरणसापेक्षत्वे तस्या अपि सापेक्षत्वं स्यात । न ह्यस्याः सापेक्षत्वं इष्टम् । अतो जटाया अपौरुषेयत्वं दुर्घटमेवेति चेत् अनादेरपि

जटाया अनादिव्याकरणप्रवाहप्रविष्टपाणिनिव्याकरणसापेक्षत्वमात्रेणापि पौरुषेयत्वाभावात्। अन्यथा सादिप्रातिशाख्यलक्षणग्रन्थसापेक्षत्वेन संहितापदक्रमाणामपि पौरुषेयत्वप्रसंगः स्यादिति ॥

तदुक्तं हयग्रीवेण 'अभिक्रमे क्रमशास्त्रं प्रमाणं स्यात्। व्युत्क्रमे व्याकरणं प्रमाणम्' इति। अभिक्रमे अनुक्रमसंक्रमयोरित्यर्थः। क्रमशास्त्रं प्रातिशाख्यशास्त्रमित्यर्थः ॥ ७ ॥

ननु यदुक्तमुपनिषदि क्रमस्येव जटादीनां संहितापदोभयानुसारित्वमिति, तन्न, जटायास्तत्र क्रमानुक्रमयोः संहितानुसारित्वदर्शनेपि पदानुसारित्वादर्शनादित्यत आह—

**षत्वणत्वे गत्वदत्वे ह्रस्वतां दीर्घतां तथा।**
**विसृज्य संहिताधर्मान् व्युत्क्रमे पदवत्पठेत् ॥ ८ ॥**

जटायां व्युत्क्रमे षत्वणत्वगत्वदत्वह्रस्वत्वदीर्घत्वादीनां संहिताधर्माः, 'गोषा इन्दो नृषा असि', 'नृमणा अधापतिं' 'तमसो गा अदुक्षत्', 'कृष्णासो दक्षि' 'सुमतिं न जुगुक्षतः' 'युवन्नो येषु वरुण क्षत्रम्' 'मित्र वयं च सूरयः' 'अच्छावदातना गिरा' इत्यादिक्रमेण प्रतीयमानान्, विसृज्य—विहाय, पदवत्—पद इव गोषा इन्दविन्दो गोसा गोषा इन्दो। गो सा इति गोऽसाः इन्दो नृषा नृसा इन्दविन्दो नृषाः'। 'नृमणा अधाध नृमना नृमणा अध' 'गा अदुक्षदधुक्षद्गा गा अदुक्षत्' 'कृष्णासो दक्षि धक्षि कृष्णासः

कृष्णासो दक्षि' 'न जुगुक्षतो जुघुक्षतो न न जुगुक्षतः' 'वरुण क्षत्रम् क्षत्रं वरुणा वरुण क्षत्रम्' 'मित्र वयं वयं मित्रामित्र वयम्,' 'अच्छावद वदाच्छाच्छावद' 'वदा तना तनावद वदा तना,' 'द्युम्ना साहमभ्य १ भिद्युम्न साहं द्युम्ना साहमभि,' 'द्यामुषासमुपसंद्यां द्यामुषासम्' 'चित्कंभनेन स्कभीयान् स्कभीयान् स्कम्भनेन चिच्चित्कम्भनेन स्कभीयान्' इत्यादिपदार्थः ॥

एवंरूपेण षत्वणत्वगत्वदत्वह्रस्वत्वदीर्घत्वादीनां संहितागतत्वादिकं नैव ॥ ८ ॥

क्वचिज्जटाव्युत्क्रमे संहितागतमोकारमपि न पठेदित्याह —

**संहितायां य ओकारः पदमौकारतां व्रजेत् ।**
**क्वचित्स व्युत्क्रमे वाच्ये औत्वेनैव जटा भवेत् ॥ ९ ॥**

जटाध्ययने प्रसक्तौ व्युत्क्रमे संहितागतमोकारं विसृज्य पदगत औकार एव जटा पठनीया। यथा — 'मृज्यते सानौ सानौ मृज्यते मृज्यते सानौ,' 'सानो अव्येऽव्ये सानौ सानो अव्ये' इत्यादि ॥ ९ ॥

ननु त्रिक्रमचतुःक्रमपंचक्रमेषु क्रमव्युत्क्रमयोराद्यान्त्यपदयोरावर्तनवत् मध्यस्य पदस्यापि किमावर्तनं कार्यमेवेत्यतो नेत्याह —

**क्रमेऽवसानस्यान्त्यत्वादाद्यस्य व्युत्क्रमेऽन्त्यतः ।**
**तयोरावर्तनं युक्तं न मध्ये त्रिक्रमादिके ॥ १० ॥**

अन्यत इति भावपरो निर्देशः। अन्यत्व इत्यर्थः। त्रिक्रमादिके — त्रिक्रमचतुःक्रमपंचक्रमेषु जटायां क्रमे अवसानपदस्यान्त्यत्वात् व्युत्क्रमे आद्यपदस्यान्त्यत्वात् तयोरन्त्याद्यपदयोः। मोषुणः 'आ सुष्माणः, ऊर्ध्व ऊषुणः' 'अगादरैगु कृष्णा' 'निरुस्वसारमस्कृतोषसम्' इत्यादिक्रमेषु क्रमेणावस्थितयोः, 'नः, मो, नः, आसु, नः, ऊर्ध्वं कृष्णा, अगात्, उषसं नि', इत्यादिरूपयोरावर्तनं — आवर्त्य पठनं युक्तम्। विप्रतिपन्नानि द्वितीयाद्यपदानि-आवर्त्य पठनीयानि क्रमान्त्यपदत्वात् अर्धर्चान्त्यक्रमान्त्यपदवदिति युक्तियुक्तमित्यर्थः। मध्ये व्युत्क्रमस्य मध्ये, मध्यस्थपदे सु स्म इत्येवंरूपेषु मध्यस्थेषु पदेषु आवर्तनं न युक्तम्। कुतः? अन्त्यपदत्वाभावादिति भावः। किं तु व्युत्क्रममध्ये एकवारपठनमेव कार्यम्। आवर्तनस्यान्त्यपदमालावर्तकत्वादित्यर्थः। यथा 'मोषुणो नः सु मो मोषुणः। मो इति मो। स्विति सु।', 'आसुष्माणो नः स्मास्वा सुष्माणः स्मेति स्म,' 'ऊर्ध्व ऊषुणो नः सूर्ध्व ऊर्ध्व ऊषुणः' ऊँ इत्यूँ स्विति सु'। 'अगादरैगु कृष्णा — कृष्णो अरैगगादगादरैगु कृष्णा, अरैगित्यरैग् ऊँ इत्यूँ। 'निरु स्वसारमस्कृतोषसमुषसमकृत स्वसारमु निर्निरुस्वसारमस्कृतोषसम्, ऊँ इत्यूँ स्वसारमिति स्वसारम्, अकृतेत्यकृत'॥

अत्र द्वित्रिचतुःक्रमपंचक्रमभ्रमवारणाय त्रीणि वेष्टनानि। न चानुमान इतिकारगर्भत्वेनावर्तनीयत्वमुपाधिः तस्य जप्यमानमंत्रेषु

अध्ययनवाक्येषु च साध्याव्यापकत्वात्। न च क्रमप्रविष्टत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वादयमुपाधिः अध्येत्रधीयमानक्रमेषु तथापि तस्य तादृशसाध्याव्यापकत्वात्। नापि साधनावच्छिन्नसाध्याव्यापकत्वादयमुपाधिरिति। तस्य स्वव्यतिरेकेण साध्यव्यतिरेकेण साध्यव्यतिरेकसाधनासमर्थत्वात्। तथाहि इतिगर्भत्वेनावर्तनीयत्वाभावेन साध्याभावसाधने जप्यमानक्रमेषु व्यभिचारः अन्त्यक्रमस्याप्यध्येतृभिरावर्तनीयत्वात् ॥ १० ॥

व्युत्क्रमे त्रिक्रमादीनां मध्यस्थपदस्यापि पदधर्मो ज्ञातव्य इत्याह —

**क्रमाणां त्रिक्रमादीनां व्युत्क्रमे मध्यमं पदम्।**
**अप्यनावर्तितं धर्मं पदस्य प्रतिपद्यते ॥ ११ ॥**

त्रिक्रमादीनां त्रिक्रमचतुःक्रमपञ्चक्रमाणां जटायां व्युत्क्रमे अनावर्तितमपि मध्यस्थपदं पदस्य धर्मं ह्रस्वत्ववर्णविलोपवर्णान्तरागमरूपं प्रतिपद्यते।

यथा – 'निराविध्यद्गिरिभ्यो गिरिभ्यो विध्यन्निर्निराविध्यद्गिरिभ्यः। अविध्यदित्यविध्यत्' 'योनिमारैगरैग्योनिं योनिमारैक्, अरैगित्यरैक्', 'अगादारैगु कृष्णा कृष्णो अरैगगादगादारैगु कृष्णा, अरैगित्यरैक्, ॐ इत्यूँ।' 'निरु स्वसारमस्कृतोषसं' 'चित्कम्भनेन स्कभीयान् स्कभीयान्स्कंभनेन चिच्चित्कंभनेन स्कभीयान् स्कंभनेनेति स्कंभनेन' ॥

अत्र आविध्यत् आरैगिति पदयोर्ह्रस्वत्वं, अकृतेत्यत्र सकारलोपः, कंभनेनेति पदे सकाररूपवर्णान्तरागमः। 'परीतोषिंचत सिञ्चतेतः परि परीतोषिञ्चत' इति जटायामित इति पदे विसर्गरूपादेशोकारस्य पुनर्विसर्गरूपादेशो द्रष्टव्यः॥ ११॥

मध्यपदबहिःकरणेन पूर्वपदस्य मध्यपदान्तरितपदमेलनेनैकपद्यमादाय प्रवृत्तक्रमेषु कथं नटेत्यत आह —

मध्यं पदं बहिःकृत्वा पूर्वोत्तरपदैक्यतः।
निहितं पदमेकं यत्तद्विलोमजटाविधौ॥ १२॥

प्रवर्तितपदात्पूर्वं भवमुक्त्वा बहिष्कृतम्।
ब्रूयादथ शुनःशेपमेकीभावयुतं पदम्॥ १३॥

"शुनश्चिच्छेपं निदितम्" इत्येवंरूपं संहितायां मध्यस्थं शुनःशेपमित्यादिरूपपदद्वयमध्यगतं चिदित्यादिरूपं बहिष्कृतं पूर्वोत्तरपदैक्याच्छुनःशेपमित्यादिपूर्वोत्तरपदमेलनादित्यर्थः। एवं पदविहितं शुनःशेपमित्यादिरूपेणैकत्वेनोच्चरितं यत्पदं तत्। शुनश्चिच्छेपं निदितमित्यादिक्रमस्य विलोमजटाविधौ व्युत्क्रमजटायामावर्तितत्वात्। निदितमित्याद्यावर्तितपदात्पश्चादनन्तरं, आदौ बहिष्कृतं चिदित्यादिरूपं पदमुक्त्वा, अतः परं—चिदित्यादिपदानन्तरं ब्रूयादित्यर्थः॥

यथा — शुनश्चिच्छेपं निदितं निदितं चिच्छुनःशेपं,

शुनश्चिच्छेपं निदितम् । शुनःशेपमिति शुनः शेपम् । चिद्विचित् ।', "ईयते नरा च शंसं दैव्यं दैव्यं च नराशंसमीयत ईयते नरा च शंसं दैव्यम्, नराशंसमिति नरा शंसं, चेति च ।" 'नरावाशंसं पूषणं पूषणं वा नराशंसं नरावाशंसं पूषणं, नराशंसमिति नराशंसं, वेति वा' ॥ १२-१३ ॥

ओदन्तानां निपातानां व्युत्क्रमजटायां प्रगृह्यत्वमाश्रयणीयमेवेत्यत आह —

**ओदन्तानां निपातानां विलोमेऽस्ति प्रगृह्यता ।**

स्पष्टोऽर्थः । 'उपो रथेषु रथेषूपो उपोरथेषु', 'प्रो अस्मा अस्मै प्रो प्रो अस्मै', 'ओषुणो न स्वो ओषुणः ॥'

**ओदन्तसंबोधनानां विलोमे न प्रगृह्यता ॥ १४ ॥**

ओकारान्तसंबोधनार्थकशब्दानां विलोमजटायां प्रगृह्यत्वं नाश्रयणीयमित्यर्थः । 'आ वायो वायवाऽऽवायो' 'इन्दविन्द्रायेन्द्रायेन्दविन्दविन्द्राय' 'अध्वर्यो अद्रिभिरद्रिभिरध्वर्योऽध्वर्यो अद्रिभिः', 'अध्वर्यो द्रावय द्रावयाध्वर्योऽध्वर्यो द्रावय' ॥ १४ ॥

**इकारान्तास्त्र्यक्षराश्चेवान्ता नैव प्रगृह्यकाः ।**

त्र्यक्षरात्मका इकारान्ता इवान्ताः शब्दा न प्रगृह्या विलोमे । यथा — 'दम्पतीव क्रतुविदाक्रतु विदादम्पतीव दम्पतीव क्रतुविदा । दम्पती इवेति दम्पती इव,' 'उषासानक्ता विदुषीव विदुषीवो-

2

नक्तोषासानक्ता विदुषीव । उषसानक्तेत्युषसा नक्ता, विदुषी इवेति विदुषी इव" 'उपधीव प्रधीव प्रधीवोपधीवोपधीव प्रधीव, उपधी इवेत्युपधी इव, प्रधी इवेति प्रधी इव ॥

ईदूदेदोदन्तशब्दा इत्यन्तास्त्र्यक्षरा अपि ॥ १५ ॥

प्रगृह्या एव जायन्ते संहितासन्ध्यभाविनः ।
ईदूदेदोद्विवचनान्तौकारास्तु तथा नहि ॥ १६ ॥

ईकार-ऊकार-एकार-ओकारान्ताः द्विवचनान्ताः त्र्यक्षरान्ता अत्र्यक्षरान्ता अपि पदकाले इतीकारान्ताः संहितायां क्वचिदपि सन्ध्यभावात् प्रगृह्या एव जायन्ते विशेषेण जटायामिति शेषः । 'इन्द्राग्नी आगतं गतमेन्द्राग्नी इन्द्राग्नी आगतम्' 'ऊरू तत्तदूरू ऊरू तत्,' 'पादा उच्येते उच्येते पादौ पादा उच्येते' 'उभे भद्रे भद्रे उभे उभे भद्रे, 'उपो अदृश्रन्नदृश्रन्नुपो उपो अदृश्रन् ॥ १५—१६ ॥

उः प्रगृह्यत्वमेत्येष मदनादिर्वतां स्वरे ।

उः उकारः प्रगृह्यत्वमेति । एष उकारो मदनादिः—मकारदकारनकारपूर्वः सन् वतां—वत्त्वं वकारादेशमिति यावत् ॥

आद्योदाहरणं यथा— 'असा उ अर्चिषार्चिषो असावसा उ अर्चिषा,' 'इयमु ते त उ इयमियमु ते,' 'गन्तवा उ १ गन्तवै गन्तवाउ,' । द्वितीयोदाहरणं यथा— 'अयमुवां वाम्वयमयमुवां' 'इमा उ वां वाम्विमा इमा उ वां' 'उभा उ नूनं नूनम्वुभा उभा उ

नूनं " 'उदुत्यं त्यम्वुदुदुत्यं' 'इदमुत्यत्यद्विदमिदमुत्यत्', 'उदुत्यत्त्य-द्वुदुदुत्यत्' 'यस्मा इरस्यसीरस्यसि यस्मै यस्मा इरस्यसि' "इरस्य-सीदिदिरस्यसीरस्यसीत्' 'इदु नु न्विदिदुनु' 'न्व १ र्यो ३ र्यो नु न्व१र्यः' इत्यादि। 'आदू नुन्वादादूनु,' ऊँ इत्यूँ। 'नुते तेनु नुते' इत्यादि ॥

इदु नु, आदु नु इत्यादिषु व्युत्क्रमे उकारस्य तु उकारान्तर-व्यवहितनकारपूर्वकत्वाद्वकारादेश इत्याह —

**उकारः प्राक्तनोकारेणैक्यादेव नपूर्वकः ॥ १७ ॥**

**व्युत्क्रमे नु उ इत्यत्राप्येति वादेशमञ्जसा ।**

व्युत्क्रमे नु उ इत्यत्रापि उकारः प्राक्तनोकारेण नकारानन्तर-भाविपूर्वतनोकारेण सहैक्यादेकादेशवत्त्वादेव नपूर्वकः सन्, अञ्जसा नियमेन, वादेशं वइत्यादेशमप्येति। अपिपदेन उकाररहितनकारपूर्व-कत्वं च समुच्चिनोति ॥

**परेप्युकार ओकार आव ओकारलोपिनः ॥ १८ ॥**

**वकारो लुप्यतेऽन्यस्मिन् लुप्यते न स्वरे परे ।**

विलोमजटायामिति शेषः। औकारलोपिनः औकारादेशभूत-स्येति यावत्। आवः आवादेशस्य वकारः उकारे ओकारेपि परे लुप्यते, न स्वरे अन्यस्मिन् परे लुप्यत इत्यर्थः। 'ऊरू पादौ पादा

ऊरू ऊरू पादौ', 'उभा उ नूनं नूनं वुभा उभा उ नूनं', 'ओमानमश्विनावश्विना ओमानमोमानमश्विनौ', 'ओजीयो धृष्णो धृष्ण ओजीय ओजीयो धृष्णो' ॥

त्र्यक्षरान्तप्रगृह्याणामुकारामन्त्रितस्य च ॥ १९ ॥
विलोमे पदसन्धौ तु प्रगृह्यत्वं न विद्यते ।

इतीन्द्राग्नी इत्यादेर्विलोमजटायां न प्रगृह्यता इत्याह कश्चित्, तन्न, तस्य त्र्यक्षरात्मकेवान्तमात्रविषयत्वात् । अन्यथा दम्पतीवेत्यादिवदिहेन्द्राग्नी इत्यादेश्च क्वचिद्वक्तव्यं स्यात्संहितायाम् ॥

उकार ओकारभावं गतोऽपि स्यात्प्रगृह्यकः ॥ २० ॥

विलोमे जटायां उकारः ओकारभावं गतोऽपि प्रगृह्य एव स्यात् । 'असा उ अर्चिषार्चिषो असावसा उ अर्चिषा' । 'अभुत्स्युप्रो अभुत्स्यभुत्स्युप्र' । 'अगादरैगु कृष्णा कृष्णो अरैगगादगादरैगु कृष्णा' ॥ २० ॥

यत्राकारोऽवगृह्यत्वे दृश्यते व्युत्क्रमे तु सः ।
इकारेणैक्यमापन्नस्तत्रैव पररूपवान् ॥ २१ ॥

यत्र एकारेऽवगृह्यत्वे द्वितीयपठने अकार एकारभूतेनेकारेण सहैक्यमापन्न एकत्वेनोच्चारणवानपि पररूपवानेव, न तु वृद्धिमान् । यथा – 'काममेत्येत्य कामं काममेत्य,' 'एत्यास्मे अस्मे एत्येत्यास्मे

एत्येत्याऽइत्य' ॥ (ब्रह्माण्योक्ता — एतौमा — बुध्नएता — इति उदाहरणानि)

अत्रायं विवेकः। क्रमवेष्टनपदानि द्विविधानि अन्त्यान्यनन्त्यानि च। तान्युभयविधान्यपि इतिगर्भत्वेन वेष्टितान्येव। तान्यपि द्विविधानि इवान्तानिवान्तभेदात्। तत्रेवान्तानि पदक्रमोभयसाधारणक्रममात्रसाधारणभेदाद् द्विधा ॥

तत्राद्यानि यथा, मेने इवेति मेनेऽइव। दम्पती इवेति दम्पतीऽइव। उपधी इवेत्युपधीऽइव। प्रधी इवेति प्रधीऽइव। आर्त्नी इवेत्यार्त्नीऽइव। इत्यादीनि। अत्र त्र्यक्षरात्मकानीवान्तानि पदक्रमसाधारण्येन इतिगर्भत्वेन वेष्टितानि दंपतीवेत्यादीनि जटायां व्युत्क्रमे न प्रगृह्यतां यान्ति। अन्यानि पदक्रमसाधारण्येन इतिगर्भत्वेन वेष्टितान्यपि जटाव्युत्क्रमे प्रगृह्याण्येव ज्ञातव्यानि। तानि यथा— 'मेने इवेति मेनेऽइव' 'अक्षी इवेत्यक्षीऽइव' प्रधी इवेति प्रधीऽइव। इत्यादीन्युदाहरणानि पूर्वं निरूपितानि। क्रममात्रसाधारणानि क्रमकाल एव इतिगर्भत्वेन वेष्टितानि। यथा ग्रावाणेवेति ग्रावाणाऽइव, गृध्रेवेति गृध्राऽइव। रथीवेति रथीऽइव। पत्नीवेति पत्नीऽइव। महिषीवेति महिषीऽइव इत्यादीनि। एषां पदानां व्युत्क्रमेणैव प्रगृह्यता। यथा ग्रावाणेव तत्तद्ग्रावाणेव ग्रावाणेव तत्। गृध्रेव वृक्षं वृक्षं गृध्रेव गृध्रेव वृक्षम्। पत्नीव पूर्वहूतिं पूर्वहूतिं पत्नीव पत्नीव पूर्वहूतिम् ॥

अन्यानि इवान्तानि उभयसाधारणानि प्रधीवेत्यादीनि। क्रममात्र-साधारणानि मण्डूका उदकादिवेति, पञ्चप्रधीरिवेत्यादीनि। अनि-वान्तानि, पदक्रमोभयसाधारण क्रममात्रसाधारणभेदेन द्विविधानि। द्विविधान्यपि अ, आ, इ, ई, उ, ऊ, ए, ऐ, ओ, औ, इति वर्णान्तपदभेदेन अनुस्वार विसर्गभेदेन व्यञ्जनान्त तद्रहितान्तपदभेदेन च चत्वारिंशद्विधानि। तान्यप्यन्त्यान्यनन्त्यानि चेति। उदाहरणानि विस्तरभयात्कानिचिदेवेह निरूप्यन्ते॥

अनिवान्तानि पदक्रमोभयसाधारणानि यथा, द्रवत्पाणी इति द्रवत्ऽपाणी। घृतवती इति घृतऽवती। वाजिनी वसू इति वाजिनी-ऽवसू। सुदानू इति सुऽदानू। मधुदुघे इति मधुऽदुघे। संवरणे इति संऽवरणे। पृथुस्तो इति पृथुऽस्तो इत्यादीनि॥

अनिवान्तान्यनन्त्यानि क्रममात्रसाधारणानि सानुस्वाराणि यथा— पुरोहितमिति पुरःऽहितम्। रत्नधातममिति रत्नऽधातमम्। सुरूपकृत्नु-मिति सुरूपऽकृत्नुम्। सुमतीनामिति सुऽमतीनाम् इत्यादीनि॥

विश्राष्टिमिति विऽश्राष्टिम्। अभिद्युमित्यभिऽद्युम्। एवं सानुस्वारोकाराद्यन्तोदाहरणानि द्रष्टव्यानि॥

अथानिवान्तानामन्त्यानां सविसर्गाणां अकाराद्यन्तानामुदाहर-णानि यथा रघुमन्यव इति रघुऽमन्यवः। निरुन्धानास इति निऽरुन्धा-नासः। गूर्तश्रवा इति गूर्तऽश्रवाः। वसुतातिरिति वसुऽतातिः।

कविक्रतुरिति कविऽक्रतुः । युवयूरिति युवऽयूः । सूक्तैरिति सुऽउक्तैः । विश्वायोरिति विश्वऽआयोः । इत्यादीनि सानुस्वारविसर्गव्यञ्जनान्त-भिन्नानि । अनिवान्तान्यनन्त्यानि यथा — उपसद्यायेत्युपऽसद्याय । समिधेति संऽइधा । द्यावापृथिवी इति द्यावा पृथिवी । अस्म-स्वित्यस्मऽसु । पुरुमंतू इति पुरुऽमंतू । उभे इत्युभे । अवया इत्यवऽयाः । अर्यमो इत्यर्यमो । सजोषसाविति सऽजोषसौ ॥

व्यञ्जनान्तानि अनन्त्यानि यथा—उद्यन्नित्युद्ऽयन् । सम्राळिति संऽराट् समित्समिदिति समित्ऽसमित् । इत्यादीनि। उदुदुहर्षसे उदु-दित्युत्ऽउत् इत्यादि ॥ अथान्तान्यनिवान्तानि सानुस्वारादि क्रममात्र — साधारणानि यथा—ऋत्विजमित्यृत्विजम् । अच्छिन्नपत्राः सचन्तां — सचन्तामिति सचन्ताम् । विश्वतस्सीं—सीमिति सीम् । अनुमदेम-जिष्णुम् जिष्णुमिति जिष्णुम् । अंगिर इत्यंगिरः । अरंकृता इत्यरं कृताः । धरुणो वसवो अग्निः — अग्निरित्यग्निः । अध्रिगुरित्यध्रिऽगुः । अरातेरित्यरातेः । विश्वदेवैरिति विश्वऽदेवैः । द्यौरिति द्यौः ॥

उभयातिरिक्तानि व्यञ्जनरहितान्तानि यथा — नूतनैरुत — उतेत्युत । अवतं नरा — नरेति नरा । धियो नरा नरेति नरा । विराजति — राजतीति राजति । वाजिनी वसू इति वाजिनीऽवसू । जनां अनु — अन्वित्यनु । विक्षु यज्यू — यज्यू इति यज्यू । वृषणश्च पौंस्ये — पौंस्य इति पौंस्ये । मंदध्या इति मंदध्यै । पितो इति पितो । वृषणावभिष्टौ अभिष्टावित्यभिष्टौ ॥

अथ व्यञ्जनान्तान्यनन्तानि यथा—देवेभिरागमत् आगमत् गमदिति गमत्। पुरुषः प्रजावान्— प्रजावानिति प्रजाऽवान्। उपरिस्विदासीत्— आसीदित्यासी३त्। अभूदित्यभूत्। दिवानॄन्— नॄनिति नॄन्। उषा व्यश्वैत्— अश्वैदित्यश्वैत्। नूनोदिति नूनोत्। अस्तौदित्यस्तौत्॥

उभयसाधारणानि अन्त्यानि यथा—मातरासमीची— समीची इति संऽईची। पितरेव शंभू— शंभू इति शम्भू। प्रयज्यो इति प्रऽयज्यो इति वेष्टनविवेकः॥ २१॥

समया नाना भवन्ति। तत्र कथं जटा कार्येत्यत आह—

आद्यं पदद्वयं शुद्धं उत्तरं तु पदत्रयम्।
अधिकं वाथ सर्वं वा समयोऽर्धर्च उच्यते॥ २२॥

तत्रादिमे पदद्वन्द्वे जटां कृत्वा जटीकृतौ।
द्वितीयं समयाद्यं च संयोज्योक्त्वा जटां ततः॥ २३॥

सर्वस्मिन्नुत्तरेऽर्धर्चं समये संहितां पठेत्।
पदत्रयादौ समये शुद्धस्याद्यपदद्वयम्॥ २४॥

संहितामवधीकृत्य ब्रूयाच्छुद्धं पदं यदि।
एकमेव तदा शुद्धावध्युक्त्वा संहितां ततः॥ २५॥

शुद्धमन्त्यमुपान्त्यं च समयस्यान्तिमं पदम्।
योजयित्वा जटामुक्त्वा पदं शुद्धं च वेष्टयेत्॥ २६॥

यत्रार्धर्चे आद्यन्तपदद्वयमेव शुद्धं भवति, उत्तरं पदत्रयं पदचतुष्टयात्मकं वा उत्तरं सर्वं अर्धर्चं वा स समय उच्यते। तत्राऽऽदिमे पदद्वन्द्वे आद्ये पदद्वये प्रथमं जटां कृत्वा जटीभूते क्रमे द्वितीयं समयाद्यं च पदं संयोज्य जटामुक्त्वा ततः तदनन्तरं उच्चरितं समये पूर्वसमये चेत्, तथाहि पठेदित्यर्थः। यथा — सदस्यास्य सत्सदस्य। अस्य मदेमदेऽस्यास्य मदे। मदे सद्वस्य पीता विंद्रः सदस्य सख्ये चकार। पदत्रये जटीकृतशुद्धपदद्वयानन्तरं पदत्रयात्मकपदचतुष्टयात्मक मात्रे वा समये शुद्धभागस्याऽऽद्यं पदमवधीकृत्य संहितां ब्रूयात्। यथा—समाकृणोषि जीवसे जीवसे समाकृणोषि समाकृणोषि जीवसे समाकृणोषीति संऽआकृणोषि — जीवसेवि वि जीवसे जीवसे वि। विवो मदे। विश्वासंपश्यन्त्संपश्यन् विश्वा विश्वासंपश्यन्॥

उक्तान्यपदद्वयानन्तरभाविसमयानन्तरमेकमेव शुद्धं चेत् कथं समयसंहिता पाठ्या। शुद्धैकपदस्य कथं वा जटा कार्येत्यत उक्तम् — शुद्धं पदं यद्येकमेवेति। यदि जटीकृताद्यपदद्वयानन्तरभाविसमयानन्तरमेकमेव शुद्धं पदं स्यात् तदा शुद्धैकपदमवधीकृत्य मध्यसमयसंहितामुक्त्वा ततः शुद्धं अन्त्यपदं समयस्यान्तिमं पदं अन्त्यभूतमर्धर्चस्योपान्त्यभूतं पदं योजयित्वा योज्यमानपदद्वयस्य जटामुक्त्वा शुद्धान्तिमपदं वेष्टयेत्। यथा — पिबतं सोमं सोमं पिबतं पिबतं सोमम्। सोमं मधुमन्तं मधुमन्तं सोमं सोमं मधुमन्तम्। मधुमन्तमश्विना बर्हिः सीदतं सुमत्सुमत्सीदतं सीदतं सुमत्। सुमदिति सुऽमत्॥

एतेन, 'यन्नासत्या परावतियद्वास्थो अध्यम्बरे—अध्यम्बरेऽम्बरेऽध्यध्यम्बरे। अम्बर इत्यम्बरे। इति जटा वाच्येति सूचितं भवति। 'आद्यान्त्ये एव शुद्धे तु यत्र तत्र पदे इमे। समयस्यादिमान्त्याभ्यां संयोज्य कथयेज्जटाम्॥ यत्रार्धर्चे आद्यान्त्ये पदे एव शुद्धे भवतः मध्ये सर्वोऽपि समयो भवति तत्र अर्धर्चे इमे आद्यान्त्ये पदे क्रमादिति शेषः। समयस्य मध्ये गलितस्याद्यान्त्याभ्यां संयोज्य जटां कथयेदित्यर्थः। यथा पुरुत्रा वृत्रहन्तमा वृत्रहन्तमा पुरुत्रा पुरुत्रा वृत्रहन्तमा। पुरुत्रेति पुरुऽत्रा। वृत्रहन्तमा तानो भूतं पुरुस्पृहा पुरुस्पृहा भूतं भूतं पुरुस्पृहा पुरुस्पृहेति पुरुऽस्पृहा ॥ २२—२६ ॥

**आद्यमध्ये एव शुद्धे पदे द्वे यत्र तत्र तु।**
**आद्ये तल्लग्नसमयस्याद्योपेते जटाविधिः॥ २७॥**

**समयस्योत्तरस्यादियुक्तमध्ये जटाविधिः।**

यत्रार्धर्चे आद्यमध्यस्थे द्वे एव पदे शुद्धे भवतः यच्छुद्धयोर्मध्ये शुद्धान्ते च समयो भवति तत्राद्यपदे शुद्धे तल्लग्नसमयस्याद्यपदसंबन्धगलितस्यादिपदं यदन्तेनोपेतेन सह समयपदानां यत्र भवति, तत्रेत्यनुवर्तते पदद्वये इत्यर्थः। जटाविधिः संपद्यत इति शेषः। समयस्यादिभूतं शुद्धं यथा—क्षत्रं जिन्वतं जिन्वतं क्षत्रं क्षत्रं जिन्वतम्। जिन्वतमुत जिन्वतं नृन् हतं हतं नृन् नृन् हतम्। हतं रक्षांसि सेधतममीवाः। एवमेव धेनूर्जिन्वतमित्यत्रापि जटा द्रष्टव्या॥

यत्र प्राक्समयस्तत्र शुद्धांशाद्यद्वयावधिः ॥ २८ ॥

संहितां संपठन्त्येव विदध्याच्छुद्धयोर्जटाम् ।
यत्राद्यांशो भवेच्छुद्धः समयश्चोत्तरांशकः ॥ २९ ॥

पूर्वांशान्त्ये तत्र पश्चात्समयाद्यपदेन च ।
योजयित्वा जटां तत्र जटाविकृतिकोविदः ॥ ३० ॥

इत्यस्योत्तरवाक्यादाकृष्य शुद्धांशाद्यद्वयावधिः । शुद्धांशः शुद्धो भागः, तस्य ये आद्ये पदे ते अवधी यस्मिन् कर्मणि यथा भवति तथा। संहितां प्राक् गलितसंहितां पठन्नेव शुद्धयोः शुद्धभागाद्यपदयोर्जटां विदध्यात् प्रथमतो जटात्वेनोच्चारणं कार्यमित्यर्थः । यथा—तवायं भाग ऋत्वियः सरश्मिस्सरश्मिर्ऋत्वियऋत्वियस्सरश्मिः । अर्धर्चपूर्वभागस्यैव शुद्धतादशायां कथं जटेत्यत उक्तं यत्राद्यांशो भवेच्छुद्धः इत्यादि। यत्रार्धर्चे आद्यांशः पूर्वभागः शुद्धो भवेत् उत्तरांशकः, स्वार्थे कः उत्तरभागस्तु समयो भवेत् तत्र विकृतिकोविदः विकृत्यष्टकपाठकुशलः इति यावत् । पूर्वांशान्त्यः शुद्धपूर्वभागांशान्त्यपरः । पश्चात्समयाद्यपदेन योजयित्वैव जटां कुर्यात् ॥

"जटात्वं प्रापयेत्ततः" — समयसंहितां पठेदित्यर्थः । यथा — वाजवन्तामरुत्वन्ता मरुत्वन्ता वाजवन्ता वाजवन्तामरुत्वन्ता वाजवन्तेति वाजऽवन्ता । मरुत्वन्ता जरितुर्गच्छतो हवम् । एतेनेयुषीणामित्यध्यर्चः। आयतीनामिति शुद्धस्य मध्यपदस्य पूर्वसमयसंहितासंबन्धेनापद्य-

मानस्योत्तरसमयादिपदसंबन्धस्य जटाभावः। पुनरायतीनां पदसंबन्धस्य पदपूर्वकसमयसंहितान्त्यपदसंबन्धस्य पठ्यमानस्य अद्यौदित्यन्त्यपदस्य जटाभावो वेष्टनं ज्ञापितं भवतीति। यथा ईयुषीणामुपमा शश्वतीनां, आयतीनां प्रथमा प्रथमायतीनामायतीनां प्रथमा, आयतीनामित्या-ऽयतीनाम्। प्रथमोषाव्यद्यौदद्यौद्विव्यद्यौत्॥

अत्र केचिदाहुः—प्रथमोषाव्यद्यौदद्यौत्। अद्यौदित्यद्यौत् इति, तच्चिन्त्यम्। तथाहि — अद्यौदित्यादिशुद्धान्तपदानां पूर्वसम्बन्धेन क्रमितत्वं जटीकृतत्वं चावश्यमभ्युपेयम्। अन्यत्रान्येषां शुद्धानां तथा भावनीयमनुभवात्। वैषम्ये कारणाभावात्। न च अद्यौदित्यादीनां पूर्वपदस्य गलितत्वेन क्रमितत्वादिकं युक्तमिति वाच्यम्, तर्हि आयतीनामित्यादिशुद्धगलितमध्यस्य पदानां पुरुत्रेत्यादिशुद्धसमय-पूर्वभाविपदानां उत्तरसमयादिपदसम्बन्धेन क्रमितत्वादिकं न स्यात्। न च तेषामुत्तरसम्बन्धाभावे शुद्धत्वं स्यादिति वाच्यम्। एवं सति अन्त्यस्य गलितोत्तरपदस्य कुतः शुद्धत्वाख्यापनम्? तथा च शुद्धपद-युक्तसमयसंहितोच्चारणपूर्वकतया पठितस्यापि शुद्धैकान्त्यस्य क्रमधर्म-त्वादिरूपं वेष्टनायोग्यत्वेन वेष्टनाभावात् अक्रममित्यस्य तस्य जटात्वेनो-पयोगित्रिरावर्तनविषयत्वासम्भवेन जटाधर्मवेष्टनविषयत्वस्याप्यभावात्। अन्त्यपदस्योत्तरार्धार्चायोत्तरक्रमसम्बन्धप्रतीतिवारणाय पूर्वार्धक्रमसमाप्ति-ख्यापनत्वे श्रूयमाणसांप्रदायिकवेष्टनस्यान्यथासिद्धत्वाच्च॥

किं चान्येषां शुद्धार्धर्चगतानां अन्त्यातिरिक्तानां आद्यानाद्य-

-पदानामुत्तरपदसम्बन्धेन क्रमितत्वनियमदर्शनात् समयान्तरितानां तथा-विधानां शुद्धानामप्याद्यानाद्यपदानामुत्तरपदयोगेन क्रमजटाभावौ किं नाङ्गीकरणीयौ ? तर्हि शुद्धार्धर्चस्थितानामपि पूर्वपदसम्बन्धेन क्रमि-त्त्वानियमदर्शनात् समयपूर्वकाणामन्त्यानामपि पदानां पूर्वपदसंबन्धेन क्रमितत्वं कुतो नाङ्गीक्रियते । वैषम्ये कारणाभावात् । नहि क्रमत्व-मुत्तरपदसम्बन्धप्रयुक्तमेवेति नियमोऽस्ति । अन्यथा शुद्धार्धर्चगताना-मन्त्यानां पदानां पूर्वपदमात्रसम्बन्धिनामुत्तरपदसम्बन्धाभावेन क्रमत्वाभाव-प्रसङ्गात् । अतः क्रमितस्यैकपदस्यान्त्यस्य जटात्वेनावर्तनं वेष्टनं च वदतामतिसाहसम् ॥ २८-३० ॥

प्लुतिस्थले कथं जटेत्यत आह —

**प्लुतिः श्रुता व्युत्क्रमेऽपि संहितायां पदक्रमे ।**

संहितापदक्रमेषु श्रुता प्लुतिः व्युत्क्रमजटायामत्यवश्यमङ्गी-कार्येत्यर्थः । स्विदासी ३ दासी३स्त्वित् स्विदासी३त् । आसी३ दुपर्युपर्यासी३दासी३दुपरि । भीरिव विन्दती ३ विन्दती ३ भीरिव भीरिव विन्दती ३ । इत्यादिव्युत्क्रमजटायाम् ॥

स्वरिताः कतिचिदेव प्रवर्तन्ते उत सर्वे इत्यत आह —

**जटायां स्वरिताः सप्त प्रवर्तन्ते विलोमके ॥ ३१ ॥**

विलोमजटायां सप्तापि स्वरिताः प्रवर्तन्त इत्यर्थः ॥

ते किन्नामान इत्यत आह —

तिरोविरामोथ तैरोव्यञ्जनः पादवृत्तकः ।
जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्ट इति ते स्मृताः ॥ ३२ ॥

ते सप्त स्वरिताः क्रमेण तिरोविरामादय इति स्मृताः स्मृति-प्रसिद्धा इत्यर्थः ॥ ३२ ॥

तिरोविरामलक्षणमाह —

तिरोविराम उच्चैरेकोपसर्गमुखे मतः ।

उदात्त एकाक्षरोपसर्गः प्रथमःपूर्वो यस्य स्वरितस्य स तिरोविराम इत्यर्थः। अत्रोपसर्गभिन्नत्वं विशेषणीयम्। अन्यथा, 'इदं विवि२दमिदं वि।' इत्यत्र व्युत्क्रमे प्रश्लिष्टेऽतिव्याप्तिः ॥

तस्योदाहरणमाह—

प्रस्तुतं च प्रचेत्यादौ तिरःपूर्वो विरामकः ॥ ३३ ॥

प्रस्तुतं च प्रचेत्युक्तिः जयतं च प्रस्तुतं चेति पादस्मारणाय। चप्र प्रचचप्र इत्यत्र तिरोविरामस्वरितो ज्ञातव्य इत्यर्थः ॥ ३३ ॥

उपसर्गेतरोदात्तः प्राक् तैरोव्यञ्जनः स्मृतः ।

उपसर्गेतरोदात्तः प्राक् पूर्वो यस्य स स्वरितः तैरोव्यञ्जन इति स्मृतः स्मृतिप्रसिद्ध इत्यर्थः। अत्र तिरोविरामेऽतिव्याप्तिवारणायोप-सर्गेतरपदम्। उपलक्षणमेतत् विवृतिभिन्नत्वेन कम्पानर्हत्वेनापि इति विशेषणीयम्। तेन कयींवदेति पादवृत्ते आत्मा क केति जात्ये रथानां

नये१रा इत्यभिनिहिते त्वं ह्य१ गदैव्येति क्षैप्रे इदं विवि३दमिदं वीति जटाव्युत्क्रमप्रश्लिष्टे च नातिव्याप्तिः ॥

तैरोव्यञ्जनमुदाहरणमुखेन स्फुटयति—

**स उक्तो व्युत्क्रमोहीळे पुरोहितमिति क्रमे ॥ ३४ ॥**

ईळे पुरोहितमित्यत्र व्युत्क्रमे जटायां तैरोव्यञ्जनो ज्ञेय इत्यर्थः । ईळे पुरोहितं पुरोहितमीळईळे पुरोहितम् ॥३४ ॥

पादवृत्तमाह—

**विवृत्तिः स्वरितः पादवृत्तनामाभिधीयते ।**

तस्मा इन्द्रायेत्यादौ इकारादेः पादवृत्तत्ववारणाय स्वरितपदं । स्वरितत्वमात्रं तिरोविरामादिसाधारणमिति विवृत्तिरित्युक्तम् । व्यञ्जनोपेतस्वरमध्यस्थो व्यञ्जनानुपेतस्वरो विवृत्तिः । इदं तु स्वरोक्तिमात्रम् । लक्षणं तु पूर्ववर्णोपेतत्वे सति व्यञ्जनानुपेतस्वरत्वमिति । तेन गन्तवा उ इत्यादौ उकारस्य विवृत्तित्वम् इमं मे गङ्ग इत्यादौ इकारादेस्तदभावश्च ज्ञापितो भवतीति ॥

कथं जात्यादिलक्षणमित्यत आह—

**जात्यस्वरः स विज्ञेयोऽपूर्वो वा नीचपूर्वकः ॥ ३५ ॥**

**यो वान्तो वा यकारान्तः क्व यूथ्यस्तदुदाहृतिः ।**
**परनीचाकारगर्भावपूर्वौ नीचपूर्वकौ ॥ ३६ ॥**

एदोतौ स्तोऽभिनिहितौ तेमासोयमुदाहृतिः ।
उकारो वाऽथ वेकारोऽपूर्वो वा नीचपूर्वकः ॥ ३७ ॥

उदात्तश्चानुदात्तेन दीर्घेणोत ह्रसीयसा ।
योगद्वयोऽथ यौ क्षैप्रौ न्युषन्यस्येत्युदाहृतिः ॥ ३८ ॥

अपूर्वौ नीचपूर्वौ च इश्च ह्रस्वो ह्रसीयसा ।
इनायुक् प्रश्लिष्टनामाऽभीदं वीदमुदाहृतिः ॥ ३९ ॥

जात्यादिलक्षणवाच्येषु चतुर्ष्वपि स्वरितपदमनुषञ्जनीयम् । स्वरितप्रकरणत्वान्न तत्कण्ठत उक्तम् ॥

अयं जात्यलक्षणवाक्ययोजनाप्रकारः—योऽयं स्वरितो अपूर्वः पूर्वाक्षररहितो वा नीचपूर्वको वा सन् वान्तः वकारान्तो यकारान्तो वा भवति। स उक्तलक्षणोपेतः जात्यनामा विज्ञेय इत्यर्थः। उदाहरणाभावात् कायं विज्ञेय इत्यत आह क यूथ्य इति। कस्वित्को विद्वांसमित्यादौ। शिशिते यूथ्यो३वृषा इत्यादौ च जात्यादिस्वरो विज्ञेय इति भावः। अभिनिहितलक्षणवाक्यार्थोयम्—अपूर्वौ नीचपूर्वकौ वा एदोतौ एकार-ओकारौ परनीचाकारगर्भौ स्तः परभूतानुदात्तह्रस्वाकारेणेति गर्भावरूपपूर्वरूपमापन्नौ भवतः, तावुभावभिनिहितनामानौ ज्ञेयावित्यर्थः। तयोरुदाहरणमस्तीति कण्ठत आह - नियुतः पुनस्ते३मेषाम्। मनसासो३यमागादित्यादौ च द्वावुक्तौ अभिनिहितौ ज्ञातव्यावित्यर्थः ॥

तदनन्तरं क्षैप्रलक्षणवाक्यार्थः। अपूर्वो वा नीचपूर्वो वा उकारो वा इकारो वा उदात्तौ सन्तौ अनुदात्तेन दीर्घेण ह्रसीयसा-ह्रस्वभूतेन वा स्वरेण योगाद्वो वकारः अथवा यो यकारो भवति तौ क्षैप्रौ उच्येते। तावुदाहृत्य दर्शयति—न्यूषन्यस्येति। उपलक्षणमेतत्। उर्वीवेत्याद्यपि ग्राह्यम्। न्यू३षु वाचम्। अतो नो रुद्राउतवान्व१स्य। उर्वींवगातुः इत्यादावुक्तविधक्षैप्रौ द्रष्टव्याविति भावः॥

अथायं प्रश्लिष्टवाक्यार्थः। उदात्तः अपूर्वो नीचपूर्वो वा उच्चः ह्रस्वः इः इकारः। ह्रसीयसा ह्रस्वस्वरेणेति शेषः। इकारेण युक् युक्तः सवर्णदीर्घरूपैकादेशं प्राप्तः सन् इति यावत्। प्रश्लिष्टनामा भवतीत्यर्थः। तस्य प्रश्लिष्टस्य अभी३दं वी३दं इत्याद्युदाहरणानि। अभी३दमेकम्। वी३दं ज्योतिर्हृदय इत्यादावुक्तः प्रश्लिष्टो ज्ञातव्य इत्याशयः॥ ३५—३९॥

**चतुर्विधानां कंपानां मध्ये यः कोपि वा भवेत्।**
**कम्पो वा तदभावो वाऽनुक्रमे संक्रमे समः॥ ४०॥**

जात्यादिचतुर्विधकम्पमध्ये यः कश्चन वा भवेत् कम्पः, तदभावो वा अनुक्रमसंक्रमयोः समानता वेत्यर्थः॥

कम्पेषु ह्रस्वदीर्घगतेषु विशेषप्रयोजनकं कालविशेषमाह—

**सार्धद्विमात्रकालोऽसौ जात्यक्षैप्रावदीर्घगौ।**
**मात्राद्वयं पूर्वभागे स्यात्पश्चादर्धमात्रिके॥ ४१॥**

दीर्घगौ क्षैप्रजात्यौ प्रश्लिष्टाभिनिहितौ तथा ।
चातुर्मात्रकालवन्तोऽनुदात्तोदात्तनीचकाः ॥ ४२ ॥

सार्धद्विमात्रकालोऽसौ भाग आद्योऽनुदात्तकः ।
मात्राकालो मध्य उच्चो नीचोऽन्त्यः सार्धमात्रकः ॥४३॥

अदीर्घगौ ह्रस्वगतौ जात्यक्षैप्रौ सार्धद्विमात्रकालौ भवतः । तयोः जात्यक्षैप्रयोः कथं सार्धद्विमात्रकालस्य विनियोग इत्यत आह मात्राद्वयं मात्राद्वयोच्चारणकालो ज्ञेयः । तयोः पश्चात् उत्तरभागे अनुदात्तरूपे अर्धमात्रिके अर्धमात्रोच्चारणकाल एव स्यात् । क१वोश्वाः यो३र्यः । दीर्घगतजात्याभिनिहितक्षैप्रप्रश्लिष्टानां कम्पानां कियानुच्चारणकालः स्यादित्यत आह—दीर्घगाविति । दीर्घगतौ क्षैप्रजात्यौ तथा प्रश्लिष्टाभिनिहितौ चेति चत्वारो भागत्रयेऽपीति शेषः । क्रमेणानुदात्तोदात्तनीचस्वरोपेताः सन्तस्तदुच्चारणसमये चतुर्मात्राकालवन्तो भवन्तीत्यर्थः । कथं चतुर्मात्राकालविनियोग इत्यत उक्तं सार्धद्विमात्रेति । अनुदात्तरूपो मध्यभागः स्वोच्चारणावसरे मात्राकालो भवति । अन्त्यनीचः सन् स्वोच्चारणसमये सार्धमात्रकः अर्धमात्रोच्चारणसहितो भवतीत्यर्थः । यथा रथ्यो३ना, व्यू३तयः । अभी३दं, सो३यम् ॥ ४१–४३ ॥

चतुर्णां जात्यादीनां कम्पे कारणं किमित्यत आह —

जात्यादीनां कम्पनं स्यादुदात्ते स्वरिते परे ।

जात्यादिस्वरितानामुदात्ते स्वरिते वा परे कम्पनं स्यात् जात्यादिकम्पनं उदात्तस्वरितान्यतरनिमित्तकमिति यावत् ॥

तर्हि सर्वोऽप्यभिनिहितो दीर्घगामित्वान्न नीचोच्चपुनर्नीच-भागभेदेन किं चातुर्मात्रिककालो भवतीत्यतः कश्चिद्बाधक इत्याह —

**पूर्वं यतोऽभिनिहितादुदात्तं दृश्यते पदम् ॥ ४४ ॥**

**तत्र नीचोच्चनीचात्मा कम्पः कार्यो न सर्वथा ।**

अत्र सार्धद्विमात्रोच्चारणे आदितः सार्धमात्रो नीचोऽन्त्यः । स्पष्टोऽर्थः । यथा रथानां नये१राः ॥ ४४ ॥

प्रकृते किमेतावताऽऽयातमित्यत आह —

**चतुर्विधाश्च स्वरिताः कम्पं प्राप्ता निमित्ततः ।**

**अनुक्रमादिरूपायां जटायां वाच्यतां गताः ॥ ४५ ॥**

जात्यादिचतुर्विधाः स्वरिता येषां स्वरितोदात्तान्यतरप्रयुक्त-कम्पाः । चतुर्विधाश्चानुक्रमोत्क्रमव्युत्क्रमाभिक्रमरूपायां जटायां सति निमित्ते वाच्या इत्यर्थः ॥ तथाहि — ह्रस्वजात्यो यथा — स स्व१ स्व१ससस्वः । वरूथं तन्वे तन्वे३ वरूथं वरूथं तन्वे । अयं व्युत्क्रमस्थो दीर्घजात्यः । यो३ह्यो३ह्यो३यो यो१ह्यः । अयमपि व्युत्क्रमस्थो दीर्घजात्यः ॥

उत्क्रमोऽभिनिहितो यथा — मे अन्यो३न्यो मे मे अन्यः ॥

व्युत्क्रमाभिक्रमयोरभिनिहितो यथा – अन्यः पक्षः पक्षो३न्यो३न्यः पक्षः । अनुत्क्रमोत्क्रमसंक्रमेषु उक्तो यथा– पक्षो३घो३घः पक्षः पक्षो३घः । व्युत्क्रमाभिक्रमयोरप्युक्तो यथा– त्वं समुद्रियाः समुद्रियास्त्वं त्वं समुद्रियाः । समुद्रिया अपो३पः समुद्रियाः समुद्रिया अपः । अपोभ्रिऽयोभ्रियो३पो३पोभ्रियः । अनुक्रमसंक्रमयोः ह्रस्वक्षैप्रो यथा–व्य१यों३यों विव्य१र्यः । अभिक्रममात्रे ह्रस्वक्षैप्रो यथा अभ्यभिहिह्य१भ्यभ्यभ्यभिहि । उत्क्रमव्युत्क्रमयोरप्युक्तो यथा – अयमभ्य१भ्य१यमयमभि । अभिक्रमे दीर्घक्षैप्रादिरपि यथा–कृत्वेना स्वा३सु कृत्वेन कृत्वेनासु । आसु स्वासु स्वास्वास्वा३सु स्वासु ॥ उत्क्रमे यथा–स्तवमान ऊत्यू३तीस्तवमानस्तवमान ऊती । उत्क्रमेऽप्युक्तो यथा – ऊर्ध्वा अभ्य१भ्यू३र्ध्वा ऊर्ध्वा अभि । व्युत्क्रमे प्रश्लिष्टो यथा— इदं विवी३दमिदं वि । इतो नावि नावी३त इतो नावि । अनुक्रमसंक्रमयोरप्युक्तो यथा–अभी३ममिममभ्य१मी३मं इत्यादि जटाकम्पास्तत्र द्रष्टव्याः ॥ ४५ ॥

इति जटालक्षणं समाप्तम् ॥

SRI GNANANANDA NIKETAN,
LIBRARY,
THAPOVANAM P. o.
Pin-605756.

## SANSKRIT

RIGVEDIYA JATA LAKSHANAM: By Venkatarama Sastri (Sri Vani Vilas Press, Srirangam).

## SANSKRIT-ENGLISH

ATMA BODHA OF SRI SANKARACHARYA: By P. N. Menon (Educational Supplies Depot, Palghat-1, Rs. 4.50).

## TAMIL

THONRINARKAL: TIRUTHILLAI YAMAKAVANTHATHI By Meenakshisundaram Pillai (Thiruvavaduthurai Adheenam, Tiruvavaduthurai).

BOMMAI VANDI: By S. Nadarasan (Kalai Vani Press, Jaffna, Rs. 4.50)

KUMARANUM KOSALAI KUMARANUM: Compiled by Kripananda Variar (Lifco, Madras-17, 90 nP.).

## KANNADA

MADHYABINDU: By C. Patil (Samaj Book Depot, Dharwar, Rs. 1.50).

## MALAYALAM

VIDDIYUTE BHARYA: By P. Velayudhan (Venus Press & Book Depot, Konni, Kerala, 85 nP.).

ASOOTHRANAM ALPAVIKASITHA RAJYANGALIL: By C. Narayanan, (Nava Kerala Co-op. Publishing House, Calicut-1, Rs. 5).